International Journal of Sanskrit Research 2017; 3(4): 205-209

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(4): 205-209
© 2017 IJSR
www.anantaajournal.com
Received: 12-05-2017
Accepted: 14-06-2017

**Sujit Maiti**
Department of Sanskrit Studies, Ramakrishna Mission, Vivekananda University, Belur Math, Howrah, West Bengal, India

**Correspondence**
**Sujit Maiti**
Department of Sanskrit Studies, Ramakrishna Mission, Vivekananda University, Belur Math, Howrah, West Bengal, India

# अनुबन्धप्रयोजनविमर्शः

**Sujit Maiti**

## प्रस्तावना

जगत्यस्मिन् प्रवाहमानानां सर्वासामेव भाषाणां भित्तिस्वरूपं खलु भवति व्याकरणम्। एवं संस्कृतभाषाया अपि। पाणिनिविरचिता सूत्रात्मिका अष्टाध्यायी एव संस्कृतव्याकरणस्य मुलभूता। सर्वेष्वपि व्याकरणेषु पाणिनितन्त्रस्यैव लौकिकवैदिकोभयप्रक्रियालङ्कृतत्वाद् वेदाङ्गत्वं [1] प्रतिपादितम्। लक्ष्यैकचक्षुष्केण पाणिनिना माहेश्वरसूत्राण्याहृत्यैव व्याकरणमिदं रचितम्।[2] व्याकरणस्यास्यापरं नाम त्रिमुनिव्याकरणम्। तत्र पाणिनिर्हि सूत्रकारः,कात्यायनः खलु वार्तिककारः पतञ्जलिश्च भाष्यकारः। एवं दृश्यते शिक्षायाम्-

''वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारञ्च प्रणतोऽस्मि मुनित्रयम् ।।'' इति।

असाधुशब्देभ्यः साधुपदानां व्युत्पत्तिप्रदर्शनार्थं पाणिनिना अतिसरलया पद्धत्या सूत्रनिर्माणं कृतम्। लघुना उपायेन अनर्थकं विना व्याकरणमिदं विरचितम्। तथाहि महाभाष्यकारेणोक्तम् 'इको यणचि' इति सूत्रभाष्ये – ''सामर्थ्ययोगान्न हि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्।'' [3] इति। सूत्रकारेण पाणिनिना अनुबन्धेन सह धातुप्रत्ययादेशागमादयः पठिताः। शास्त्रस्य अनर्थरहितत्वात् एवं प्रतिपाद्यते यत् अनुबन्धानां किमपि प्रयोजनं वर्तते। कानि च तानि प्रयोजनानि इति समासेनालोच्यते।

''अनुबन्धकरणार्थश्च वर्णानामुपदेशः कर्तव्यः'' इति महाभाष्यकारेण पस्पशाह्निके उक्तम्। तर्हि आदौ ज्ञातव्यम् अनुबन्ध इति किम्? भट्टोजिदीक्षितमतानुसारम् 'इत्संज्ञावत्त्वमनुबन्धत्वम्' [4] इति, नागेशमते तु 'इत्संज्ञायोग्यत्वमनुबन्धत्वम्' [5] इति। तयोः मध्ये नागेशमतमेव युक्तियुक्तम्। कारणं यद्यपि अधुना तस्य इत्संज्ञा न भवति परन्तु भाविनि काले इत्संज्ञा भविष्यति अर्थात् इत्संज्ञाया योग्यत्वमस्ति। यस्येत्संज्ञा भवति लक्ष्ये कदापि तस्य प्रयोगो न दृश्यते। अनुबन्धाः प्रत्ययादीनामवयवा अनवयवा वेति जिज्ञासायां सिद्धान्तिनोच्यते अनुबन्धा अवयवा अर्थात् 'एकान्ताः' इति पक्षे त्रयो दोषाः समुपस्थिताः। तद्दूरीकरणार्थं परिभाषात्रयमागच्छति। यथा- 'नानुबन्धकृतमनेकालत्वम्', 'नानुबन्धकृतमनेजन्तत्वम्', 'नानुबन्धकृतमसारूप्यम्' चेति। तत्तु परिभाषेन्दुशेखरे नागेशेन सविस्तारेणालोचितम्।

कस्मैचित् कार्यायोच्चार्यमाणो वर्ण इत्संज्ञा भवतीति केचित्। व्याकरणशास्त्रे विशेषकार्याय प्रातिपदिक-धातु-विभक्ति-प्रत्ययागमादेशादीनामनुबन्धरूपेण उच्चारितवर्णानामित्संज्ञा भवति। न्यायकोशे भीमाचार्यझलकीकारेणोक्तम्- ''प्रकृतिप्रत्ययागमादेशानां विकरणागमगुणवृद्ध्यादिकार्यविशेषर्थमनुबन्धनीयः परिनिष्पन्नपदकालेषु अश्रूयमानतया नश्वर-इत्संज्ञातया कृतलोपवर्ण इति शाब्दिकाः। ''इति। अपि च 'Anubandhas of Panini' इति ग्रन्थे देवस्थलिमहोदयेनोक्तम्- ''Panini does not used the term Anubandha, but he used the term it (इत्). But it's not defind by him. So of appars that it was brought in to vogue by some predecenor,.... was taken over by Panini and utilized.''

इतो लोपो न पर्यायवाचकः। इत्संज्ञकस्य वर्णस्य 'तस्य लोपः' इति सूत्रेण लोपो भवति। पाणिनिव्याकरणे 'उपदेशेऽजनुनासिक इत्'(१/३/२) इत्यस्माद् 'लशक्वतद्धिते' (१/३/८) इति पर्यन्तं पठितानि सूत्राणि इत्संज्ञाविधायकानि। आदौ इत्संज्ञकानि सूत्राणि समानेनालोच्यते। यतः इत्संज्ञायोग्यत्वमनुबन्धत्वम्।

- उपदेशेऽजनुनासिक इत्(१/३/२)- उपदेशे अनुनासिकोऽज् इत् भवति। उपदेशो नाम आद्योच्चारणम्। उपदिश्यते अनेनेति उपदेशः। उपशब्द आद्यर्थकः। दिशिरुच्चारणक्रियायाम्।
- हलन्त्यम्(१/३/३)- उपदेशेऽन्त्यं हल् इत् भवति। अन्ते भव इति अन्त्यः। उपदेशविषये कारिका इयं वर्तते।–

''धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम्।
आगमप्रत्ययादेशा उपदेशाः प्रकीर्त्तिताः।।''' [6] इति।

- आदिर्ञिटुडवः(१/३/५)- उपदेशे धातोराद्या ञिटुडवः इतो भवन्ति।
- षः प्रत्ययस्य(१/३/६)- प्रत्ययस्यादिः षकार इत्संज्ञको भवति।
- चुटू(१/३/७)- प्रत्ययस्याद्यौ चवर्गटवर्गौ इतौ भवतः।
- लशक्वतद्धिते(१/३/८)- तद्धितभिन्नस्य प्रत्ययस्यादिभूतं लकारशकारकवर्गम् इत्संज्ञं भवति।

अधुना अनुबन्धानां प्रयोजनान्यध आलोच्यते समासेन।

**धातुपाठे अनुबन्धानां प्रयोजनानि-**

*आ-इत्-* 'आदितश्च' (७/२/१६) इति सूत्रेण आकारेतो धातोः निष्ठायाः इण्न स्यात्। यथा- ञिष्विदा>स्विन्ना, ञिभिदा>भिन्न।

*इ-इत्-* 'इदितो नुम्धातोः' (७/२/५८) इति सूत्रानुसारं इत्संज्ञकेदन्तधातोः नुमिति आगमो भवति।नुमि मकार इत् उकारश्च उच्चारणार्थः। यथा- इदि>इन्द्, चुवि>चुम्व, नदि>नन्दति।

*इर्-इत्-* 'इरितो वा'(३/१/५७) इत्यस्मिन् सूत्रे 'धातोरेकचो हलादेः क्रियासमभिहरे यङ्'(३/१/२२) इत्यतो धातोरिति 'च्लेः सिच्' इत्यस्मात् च्लेरिति 'अस्यतिवक्तिख्यातिभ्योऽङ्' इत्यतः अङिति पुषादिद्युतादीत्यतः परस्मैपदेष्विति च अनुवर्तन्ते। अर्थात् इरितो धातोः च्लिस्थाने अङ् वा स्यात् परस्मैपदे परे। यथा- भिदिर्>अभिदत्, छिदिर्>अच्छिदत्।

*ई-इत्-* ईदितो धातोः निष्ठाया इण्न स्यात् 'श्वीदितो निष्ठायाम्'(७/२/१४) इति सूत्रेण। यथा- ओलजी>लग्न, ओविजी>उद्विग्न।

*उ-इत्-* 'उदितो वा'(७/२/५६) इति सूत्रेण उदितो धातोः परस्य क्त्वाप्रत्ययस्य इड् वा स्यात्।

यथा- शमु>शमित्वा/शान्त्वा, दमु>दमित्वा/दान्त्वा।

*ऊ-इत्-* ऊदितो धातोः परस्य वलादेरार्धधातुकस्येड् वा स्यात् 'स्वरतिसूतिसूयतिधूञूदितो वा'(७/२/४४) इत्यनेन।

यथा- गाहु>गहिता/गाढा, गुपू>गोपिता/गोप्ता।

*ऋ-इत्-* 'नाग्लोपिशास्वृदिताम्'(७/४/२) इति विधिसूत्रानुसारं ऋदितां चोपधाया ह्रस्वो न स्यात् चङ्परे णौ।

यथा- वाधृ>अववाधत्, याचृ>अययाचत्, ढौकृ>अजुढौकत्।

*ऌ-इत्-* 'पुषादिद्युताद्ऌदितः परस्मैपदेषु'(३/१/५५) इति परस्मैपदेषु ऌदितो धातोः च्लिस्थाने अङ् स्यात्।

यथा- शकॢ>अशकत्।

*ए-इत्-* 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्'(७/२/५) इत्यनेन एदितो धातोः वृद्धिर्न स्यात् इडादौ सिचि परस्मैपदेषु।

यथा- रगे>अरगीत्, कखे>अकखीत्।

*ओ-इत्-* ओकारेतो धातोरुत्तरं निष्ठायाः तकारस्य स्थाने नकारादेशो भवति 'ओदितश्च'(८/२/४५) इति सूत्रानुसारम्।

यथा- ओलस्जी>लग्नः, ओविजी>विग्नः।

*ङ्-इत्-* ङितो धातोः लस्य स्थाने आत्मनेपदं स्यात् 'अनुदात्तङित आत्मनेपदम्'(१/३/१२) इत्यनेन। यथा-शीङ्>शेते।

*ञ्-इत्-* 'स्वरितञितः कर्त्रभिप्राये क्रियाफले'(१/३/७२) इति सूत्रानुसारं कर्तृगामिनि क्रियाफले ञितो धातोः आत्मनेपदं स्यात्। यथा- डुकृञ्>कुरुते।

अपि च ञि-इत् यस्य धातोः तस्माद्वर्तमानक्रियावृत्तेः क्त-प्रत्ययः स्यात् 'ञीतः क्तः'(३/२/१८७) इत्यनेन सूत्रेण।

यथा- ञिक्ष्विदा>क्ष्विण्णः, ञिइन्धी>इद्धः, ञिमिदा>मिन्नः, ञिधृषा>धृष्टः।

*टु-इत्-* 'ट्वितोऽथुच्' (३/३/८९) इति सूत्रेण ट्वितो (टुः इत् यस्येति,तस्मात्) धातोः उत्तरं भावाद्यर्थे अथुच् इति प्रत्ययः स्यात्।

यथा- टुवेपृ>वेपथुः।

*डु-इत्-* ड्वितो (डुः इत् यस्य सः,तस्मात्) धातोः क्रि-प्रत्ययः स्यात् भावे अकर्तरि च कारके। यथा- डुकृञ्>कृत्रिमम्, डुपचष्>पक्त्रिमम्।

*ण्-इत्-* 'दाणश्च सा चेच्चतुर्थ्यर्थे'(१/३/५५) इत्यस्मिन् सूत्रे णिता दानार्थको दा-धातुरेव ज्ञाप्यते। धातुपाठे चतुर्विधः दा-धातुः परिलक्ष्यते। 'दाधा घ्वदाप्' (१/१/२०) इति सूत्रे तत् ज्ञापितमाचार्येण। यथा- दाञ् दाने(ह्वादि)-ददाति, दाप् छेदने(अदादि)-दाति, दैप् शोधने(भ्वादि)-अवदायति, दो खण्डने(दिवादि)-अवद्यति।

तथा 'इणो यण्'(६/४/८१) इति सूत्रे णित्त्वेन बोध्यते यत् अस्मिन् स्थले गमनार्थकम् इण्-धातुं गृहीत्वैव कार्यं भवति। त्रिविध इ-धातुः दृश्यते धातुपाठे। यथा- 'इण् गतौ', 'इक् स्मरणे', 'इङ् अध्ययने'। तथाहि बालमनोकारेण वासुदेवदीक्षितेनोक्तम्- ''इणो यण् इत्यादौ विशेषणार्थो णकारः।'' इति। अतः कदाचिद् अनुबन्धाः समानाकृतिविशिष्टानां धातूनां पृथक् कुर्वन्ति।

*प्-इत्-* तथैव 'दाधा घ्वदाप्' (१/१/२०) इत्यस्मिन् सूत्रे दाप्(लवणे), दैप्(शोधने) चेति धातयोः पित्त्वं घुसंज्ञाप्रतिषेधार्थम्। तथाहि तत्त्वबोधिन्यामुक्तं श्रीज्ञानेन्द्रसरस्वतिमहोदयेन- ''दैपः पित्त्वमिह प्रतिषेधार्थं न त्वनुदात्तार्थम्।'' इति। अतः पितो धातोः अनुदात्तस्वरो भवतीति ज्ञाप्यते।

*ष्-इत्-* 'षिद्भिदादिभ्योऽङ्' (३/३/१०४) इति सूत्रेण षिद्भ्यो धातुभ्यः स्त्रियामङ् स्यात् भावे अकर्तरि च कारके। यथा- जृष्>जरा, त्रपूष्>त्रपा।

प्रत्यये अनुबन्धानां प्रयोजनानि-

*उ/ऋ/ ऌ-इत्-* 'उगिदचां सर्वनामस्थानेऽधातोः' (७/१/७०) इत्यत्र उक्(उ,ऋ,ऌ) इत् येषां ते, उगितः। अधातोरित्युगिद्विशेषणम्। अर्थात् अधातोरुगितो नुमागमः स्यात् सर्वनामस्थाने परे। नुमि मकार इत् उकारश्चोच्चारणार्थः। यथा- भवान् भवन्तौ भवन्तः।

तथा 'उगितश्च' (४/१/६) सूत्रे उगिद् द्विविधं प्रातिपदिकं प्रत्ययश्च। प्रत्ययमुगितमुदाहरति पचन्तीति। पच्-धातोः लटः स्थाने शतृप्रत्यये, शित्त्वेन सार्वधातुकत्वात् शपि पररूपे पचत् इति निष्पद्यते। तत्र शतृप्रत्यये शकारऋकारावितौ। अतः शतृप्रत्यय उगित्। तदन्तं पचत् इति प्रातिपदिकम्। तथाहि अनेन सूत्रेण स्त्रियां ङीप्स्यात्।

*क्-इत्-* 'क्ङिति च' (१/१/५) इत्यनेन किन्निमित्ते इग्लक्षणे गुणवृद्धी न भवतः। यथा- चितः। चि-धातोः क्तप्रत्यये 'सार्वधातुकार्धधातुकयोः' (७/३/८४) इत्यनेन गुणप्राप्ते कित्वात् गुणनिषेधे विभक्तिकार्ये चितः इति रूपं सिद्धम्।

तथा 'किति च' (७/२/११८) इति सूत्रेण किति तद्धिते परे अचामादेरचो वृद्धिर्भवति। यथा- नाडायनः। नडशब्दात् गोत्रापत्यार्थे 'नडादिभ्यः फक्' (४/१/९९) इत्यनेन फक्-प्रत्यये 'आयन्-एय्-ईन्....' (७/१/२) इति फस्यायनादेशे भत्वे 'यस्येति च' (६/४/१४८) इत्यकारलोपे, कित्वाद् आदिवृद्धौ नाडायन इति सिद्धम्।

'कितः' (८/१/१६४) इत्यनेन कितः तद्धितस्य अन्तोदात्तो भवति। यथा- आग्नेयः।अग्निशब्दोत्तरं 'अग्नेर्ढक्' (४/२/३३) इति ढक्-प्रत्यये आग्नेय इति निष्पद्यते। ढक् इति कित्वात् 'कितः' इति सूत्रानुसारं अन्तोदात्तो भवति।

'द्यतिस्यतिमास्थामित्ति किति' (७/४/६६) इत्यनेन द्यत्यादिचतुर्णां धातूनां तादौ कित्प्रत्यये परे इकारः अन्तादेशो भवति। यथा- नि-दो(अवखण्डने)+क्त= निर्दितः। षो(अन्तकर्मणि)+क्त= सितः।

*ख्-इत्-* 'खित्यनव्ययस्य' (६/३/६६) इति खिदन्ते उत्तरपदे अनव्ययस्य ह्रस्वः स्यात्। यथा- इरम्मदः। इरया माद्यति, इरम्मदो मेघज्योतिः। इरा इति उपपदात् मृद्-धातोः 'उग्रम्पश्येरम्मदपाणिवन्धमाश्च' इति निपातनात् खशि 'खित्यनव्ययस्य' इति पूर्वपदस्याकारस्य ह्रस्वे मुमि, शपि, पूर्वरूपे, ''इरम्मद'' इति सिध्यति। तथा कालिमन्या।

'अरुर्द्विषदजन्तस्य मुम्' (६/३/६७) इति सूत्रानुसारं खिदन्तप्रत्ययोत्तरपदे अरुषो द्विषतोऽजन्तस्य च मुमित्यागमः स्यात्। यथा- अरुन्तुदः, द्विषन्तपः, जनमेजयः।

*ग्-इत्-* अत्रापि 'क्क्ङिति च' (१/१/५) इति सूत्रेण गिति परे इको गुणवृद्धी न भवतः। यद्यपि सूत्रे गकारो न दृश्यते तथापि सूत्रेऽस्मिन् गकारस्य प्रश्लेषः स्वीकरणीयः। अन्यथा जिष्णुरित्यत्र गुणनिषेधो न स्यात्। तथाहि वासुदेवदीक्षितेन बालमनोरमायामुक्तम्- ''कात्पूर्वं गकारस्य चर्त्वेन निर्देशात् ग् क् ङ् चेत् यस्येति विग्रहः।'' इति। तत्त्वबोधिन्यामप्युक्तम्- ''क्ङिति च इति सूत्रे चर्त्वेन गकारोऽपि प्रश्लिष्यत इत्याशयेन गित्किन्ङिन्निमित्त इत्युक्तम्।'' इति।सूत्रेऽस्मिन् गितीति न स्वीक्रियते चेत् 'ग्लाजिस्थश्च ग्स्नुः' (३/२/१३९) इत्यनेन

भविस्नुः(भव+ग्स्नुः), जेस्नुः(जि+ग्स्नुः) इत्यादीनि अनिष्टरूपाणि भवन्ति।[7]

*घ-इत्-* 'चजोः कु घिण्ण्यतोः' (७/३/५२) इत्यनेन सूत्रेण घिति प्रत्यये परे चस्य जस्य च कुत्वं स्यात्। यथा- पच-धातोः घञि 'चजोः कु घिण्ण्यतोः' इत्यनेन सूत्रेण घित्वात् कुत्वे उपधावृद्धौ पाकशब्दो निष्पद्यते। तथैव त्यागः, रागः प्रभृतयः।

*ङ्-इत्-* अत्रापि 'क्ङिति च' (१/१/५) इति सूत्रेण ङिति प्रत्यये परे इको गुणवृद्धी न स्तः। 'घुमास्थागापाजहातिसां हलि' (६/४/६६) इत्यनेन घु,मा,स्था,गा,पा,जहाति(ओहक्) सा(षोऽन्तकर्मणि) एषां अन्तःस्थाने ईत् स्यात् हलादौ किति ङिति आर्धधातुके परे। यथा- दीयते, धीयते, मीयते, स्थीयते, जेगीयते, पीयते, हीयते, अवसीयते।

अपि च 'ङिति ह्रस्वश्च' (१/४/६) इति सूत्रेण ह्रस्वो भवति। तथा ''दीङो युडचि क्ङिति'' (६/४/६३) इत्यनेन दीङ्-धातोः युडिति आगमो भवति अजादिङिति परे।

*च्-इत्-* 'चितः' (६/१/१६३) इत्यस्मिन् सूत्रे चिदस्यास्तीति विग्रहे अर्श आदेराकृतिगणत्वाद् 'अर्श आदिभ्योऽच्'[8] इति सूत्रेण अच्-प्रत्ययः। अतः सूत्रार्थ एवम्- चित्प्रत्ययान्तशब्दस्य अन्तोदात्तो भवति। यथा- तकत्सुतं॑।

तथैव 'तद्धितस्य' (६/१/१६४) इति सूत्रानुसारं चितः तद्धितस्य अन्तोदात्तो भवति। यथा- कौञ्जायनाः।

*ञ्-इत्-* 'अचो ञ्णिति' (७/२/११५) इति सूत्रेण ञिति णिति परे अजन्तस्याङ्गस्य वृद्धिः स्यात्।

'तद्धितेष्वचामादेः' (७/२/११७) इत्यनेन अचामादेरचो वृद्धिः स्यात् ञिति णिति च तद्धिते परे स्थिते।

यथा- आश्वपतम्। अश्वपतेरणि ञित्त्वादादिवृद्धौ 'यस्येति च' इति इकारलोपे सुप्कार्ये आश्वपतमिति सिद्धम्।

'ञ्नित्यादिर्नित्यम्' (६/१/१९७) इत्यनेन सूत्रेण ञिदन्तप्रत्ययान्तशब्दस्य आदिरुदात्तो भवति। यथा- ''यस्मिन्विश्वानि पौंस्या॑''(ष्यञ्)।

*ट्-इत्-* 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः' (४/१/१५) इत्यस्मिन् सूत्रे टित् त्रिविधम्। यथा-प्रत्ययः, प्रातिपदिकम्, धातुश्च। अत्र प्रत्ययस्यैव आलोचना क्रियते। टित्प्रत्ययान्तपदोत्तरं स्त्रियां ङीप् भवति। यथा- कुरुचरी, कुरुषु चरतीति विग्रहे अधिकरणे उपपदे 'चरेष्टः' (३/२/१६) इत्यनेन कर्तरि ट-प्रत्ययो भवति। ट-प्रत्ययस्य टकार इत्। अतः कुरुचर इति शब्दोत्तरं टित्त्वात् स्त्रित्वविवक्षायां ङीप् भवति।

*ड्-इत्-* 'टेः' (६/४/१४३) इति सूत्रेण भस्य[9] टेर्लोपः स्यात् डिति प्रत्यये परे। यथा- कुमुद्वान्।

*ण्-इत्-* पूर्वं अर्थात् 'ञित्' इत्यत्र आलोचितम्।

*त्-इत्-* 'तित् स्वरितम्' (६/१/१८५) इति सूत्रेण तित्-प्रत्ययान्तस्य अन्तस्वरः स्वरितः स्यात्। यथा- ''क्व॑ नूनम्''।

*न्-इत्-* 'ञ्नित्यादिर्नित्यम्' (६/१/१९७) इति निदन्तस्य प्रत्ययान्तशब्दस्यादिरुदात्तो भवति। यथा- वेदः॑।

*प्-इत्-* 'अनुदात्तौ सुप्पितौ' (३/१/४) इति सूत्रेण पित्-प्रत्ययस्य अनुदात्तस्वरो भवति।

*र्-इत्-* 'उपोत्तमं रिति' (६/१/२१७) इति रित्प्रत्ययान्तशब्दस्योपत्तममुदात्तं भवति। यथा- यदाहवनीये।

*ल्-इत्-* 'लिति' (६/१/१९३) इति सूत्रेण लिति प्रत्ययात् पूर्वमुदात्तो भवति। यथा- चिकीर्षकः।

*श्-इत्-*'पा-घ्रा-ध्मास्थाम्नादाण्दृश्यर्त्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः '(७/३/७८) इत्यनेन सूत्रेण शिति प्रत्यये पादीनां धातूनां स्थाने पिवादय आदेशाः स्युः। यथा- पिवति, जिघ्रति, धमति, तिष्ठति चेति।

*ष्-इत्-* 'षिद्गौरादिभ्यश्च' (४/१/४१) इति सूत्रानुसारं षित्प्रत्ययान्तपदेभ्यो स्त्रियां ङीष् स्यात्। यथा- नर्तकी ('शिल्पिनि ष्वुन्'[10])।

प्रातिपदिके अनुबन्धानां प्रयोजनानि-

*उ/ऋ/ ऌ-इत्-* 'उगितश्च'(४/१/६) इति सूत्रेण उगिदन्तात् प्रातिपदिकात् स्त्रीत्वद्योत्ये ङीप् भवति। सूत्रेऽस्मिन् उगित् इति शब्देन द्विविधम् उगिद् बोध्यते। तत् यथा- प्रातिपदिकम् प्रत्ययश्चेति। तत्र प्रातिपदिकस्य उदाहरणं यथा सर्वादिगणे ''भवतु'' इति अव्युत्पन्नं प्रातिपदिकं पठितम्। भवतु इति उगित्त्वात् स्त्रीयां ङीप् स्यात्। तथाहि ''भवती'' इति रूपं दृश्यते। अन्यथा भू-धातोः शतृप्रत्यये स्त्रीत्वद्योत्ये ङीप्प्रत्यये नुमित्यागमे भवन्ती इति रूपं व्युत्पद्यते।

*ट्-इत्-* 'टिड्ढाणञ्द्वयसज्द....'(४/१/१५) अनेन सूत्रेणैव टिदन्तात् प्रातिपदिकात् स्त्रियां ङीप्-प्रत्ययो भवति। अत्र टित् इति पदेन त्रिविधः टित् सूच्यते। यथा-प्रत्ययः प्रातिपदिकम् धातुश्च। तत्र प्रातिपदिकमुदाहरति नदट्>नदी। नदट् इति प्रातिपदिकं पचादिगणे पठितम्। नदट् इति टित्वादनेन सूत्रेणैव स्त्रीयां ङीप् स्यात्।

आगमे अनुबन्धानां प्रयोजनम्-

*क्-इत्-* 'आद्यन्तौ टकितौ'(१/१/४६) इति सूत्रेण किदिति आगमः अन्तावयवो भवति। यथा- पा णिच् ति। पा इ ति इति स्थिते 'शाच्छासाह्वाव्यावेपां युक्'(७/३/३७) इति सूत्रेण युकिति

आगमे 'आद्यन्तौ टकितौ' इति सूत्रानुसारं कित्वाद् धातोः अन्तावयवरूपेण स्थिते शपि, गुणे, सन्धिकार्ये च पाययति इति रूपं सिध्यति।

*ट्-इत्-* 'आद्यन्तौ टकितौ'(१/१/४६) इत्यनेनैव टित् आगमः आद्यवयवो भवति। यथा- भू-धातोः लुटि प्रथमैकवचने 'स्यतासी लृलुटोः'(३/१/३३) इति सूत्रेण तास् इति भूत्वा ''भू तास् ति'' इति स्थिते तासः आर्धधातुकसंज्ञायां इडागमे, टित्वात् तास आद्यवयवे, गुणे, अवादेशे च भविता इति रूपं सिध्यति।

*म्-इत्-* मकार इत् यस्य स मित्। मित् इति आगमः अचां मध्ये अन्त्यादचः परो भवतीति 'मिदचोऽन्त्यात् परः'(४/१/४७) इति विधीयते। यथा- वन जस्>वन शि>वन नुम् शि>वनन् इ>वनानि।

आदेशे अनुबन्धानां प्रयोजनम्-

*ङ्-इत्-* 'ङिच्च'(१/१/५३) इत्यनेन सूत्रेण ङकार इत् यस्यादेशस्य, स अन्त्यस्य अलः स्थाने भवति। यथा- 'अवङ् स्फोटायनस्य'(६/१/१२३) इति सूत्रेण गो-शब्दस्य अवङ् इति आदेशो भवति अचि परे। अवङिति ङित्वात् गो इति शब्दस्य अन्त्यवर्णस्य ओकारस्य स्थाने भवति। यथा- गो अग्रम्>ग् ओ अग्रम्>ग् अव अग्रम्>गव अग्रम्>गवाग्रम्।

*श्-इत्-* 'अनेकाल्शित्सर्वस्य'(१/१/५५) इत्यनेन शकार इत् यस्य आदेशस्य, तस्य(शितः) सर्वादेशत्वविधिः प्रतिपाद्यते।

अष्टन्शब्दात् जसि शसि च 'अष्टन आ विभक्तौ' [11] इति आत्वे ''अष्टा अस्'' इति स्थिते 'अष्टाभ्य औश्' [12] इति कृताकाराद् अष्टनः परयोर्जशशसोर्विधीयमान औशादेशः शित्वात् 'अलोऽन्त्यस्य' [13] इति बाधित्वा सर्वादेशो भवति। यद्यपि 'आदेः परस्य' [14] इत्यस्यापि अवकाशः परन्तु 'विप्रतिषेधे परं कार्यम्' [15] इत्यनेन परत्वात् 'अनेकाल्शित्सर्वस्य' [16] इत्यनेन बाध्यते।

माहेश्वरसूत्रेषु अनुबन्धानां प्रयोजनम्-

माहेश्वरसूत्रेषु अनुबन्धानां महत् प्रयोजनं परिलक्ष्यते। महेश्वरप्रसादात् एतानि चतुर्दश सूत्राणि पाणिनिना लब्धानि। एतेषां चतुर्दशसूत्राणां श्रुतिरूपत्वेन आम्नायसमाम्नायशब्देन व्यवहारो नानुपपन्नः। श्रुतिमूलकत्वाद् व्याकरणस्यापि वेदाङ्गत्वम् उपपन्नम्। शब्दशास्त्रेऽस्मिन् वर्णानामुपदेश किमर्थं इति जिज्ञासायां भाष्यकारेणोक्तम्- ''अनुबन्धकरणार्थश्च वर्णनामुपदेशः।'' इति। पतञ्जलिना करणशब्देन अनुबन्धानां सादित्वं सूचितम्। अर्थात् अनुबन्धाः कैश्चित् संयुक्ता इति आभासते। तर्हि अनुबन्धानां कर्ता क इति प्रश्न आयाति। दृश्यते उपदेशस्य कर्ता खलु अनुबन्धानां कर्ता। अर्थात् महेश्वर एव अनुबन्धानां कर्ता इति निष्पद्यते। न हि अनुबन्धं विना शास्त्रप्रवृत्तिः। कारणं अनुबन्धं ऋते प्रत्याहारसंगठनासम्भवात् शास्त्रे गौरवत्वमायाति। यतः शास्त्राप्रवृत्तिः जायते गौरवत्वात्। तथाहि अनुबन्धकरणं लाघवेन शास्त्रप्रवृत्त्यर्थमिति सूचितम्। माहेश्वरसूत्रेषु चतुर्दश अनुबन्धानाहृत्य साकल्येन त्रयश्चत्वारिंशत् (चतुश्चत्वारिंशदिति मतान्तरम्) प्रत्याहाराः जायन्ते। पूर्वेण णकारेण एकः प्रत्याहारः- अण् । ककारेण त्रयः- अक्, इक्, उक् । ङकारेण एकः- एङ् । चकारेण चत्वारः- अच्, इच्, एच्, ऐच् । टकारेण एकः- अट् । परेण णकारेण त्रयः- अण्, इण्, यण् । मकारेण चत्वारः- अम्, यम्, ञम्, ङम् । ञकारेण एकः- यञ् । षकारेण द्वौ- झष्, भष् । शकारेण षट्- अश्, हश्, वश्, झश्, जश्, बश् । वकारेण एकः- छव् । यकारेण पञ्च- यय्, मय्, झय्, खय्, चय् । रेफेण पञ्च- यर्, झर्, खर्, चर्, शर् । लकारेण षट्- अल्, हल्, वल्, रल्, शल्।

एवं व्याकरणशास्त्रे अनुबन्धानां प्रयोजनमतिसमासेन वर्णितमिति शिवम्।।

## सहायकग्रन्थसूची


1. श्रीब्रह्मानन्दद्विवेदी. लघुशब्देन्दुशेखरः (पञ्चसन्ध्यन्तो भागः). २००८. चौखम्बासंस्कृतसीरीज आफिस; वाराणसी।
2. तपनशङ्करभट्टाचार्य. अष्टाध्यायी. २०१२. संस्कृतवुक्डिपो; कलिकाता।
3. विश्वनाथमिश्र. परिभाषेन्दुशेखर. २००५. चौखम्बासुरभारतीप्रकाशन; वाराणसी।
4. तपनशङ्करभट्टाचार्य. वैदिकव्याकरण. २००२. संस्कृतवुक्डिपो; कलिकाता।
5. शिवप्रसादशर्मा. वैयाकरणसिद्धान्तकौमुदी. २००८. चौखम्बाविद्याभवन; वाराणसी।
6. जयशङ्करलालत्रिपाठी, सुधाकरमिश्र. काशिका. १९८४. ताराबुकएजेन्सी; वाराणसी।
7. Lahiri and Shastri. A higher Sanskrit grammer and composition. Dacca student library; Kolkata, 2009.